# Shambhu Stotram

# શમ્ભુસ્તોત્રમ્

## Document Information

Text title : shambhustotra

File name : shambhustotra.itx

Category : shiva, stotra

Location : doc_shiva

Transliterated by : Sridhar Seshagiri sridhar.seshagiri at gmail.com

Proofread by : Sridhar Seshagiri sridhar.seshagiri at gmail.com

Description-comments : Hymn on Lord Shiva

Latest update : February 15, 2002

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 28, 2022

*sanskritdocuments.org*

# શમ્ભુસ્તોત્રમ્

નાનાયોનિસહસ્રકોટિષુ મુહુઃ સમ્ભૂય સમ્ભૂય તદ્-
ગર્ભાવાસનિરન્તદુઃખનિવહં વક્તું ન શક્યં ચ તત્ ।
ભૂયો ભૂય ઇહાનુભૂય સુતરાં કષ્ટાનિ નષ્ટોઽસ્મ્યહં
ત્રાહિ ત્વં કરુણાતરઙ્ગિતદૃશા શમ્ભો દયામ્ભોનિધે ॥ ૧॥

બાલ્યે તાડનપીડનૈર્બહુવિધૈઃ પિત્રાદિભિર્બોધિતઃ
તત્કાલોચિતરોગજાલજનિતૈર્દુઃખૈરલં બાધિતઃ ।
લીલાલૌલ્યગુણીકૃતૈશ્ચ વિવિધૈર્દુશ્ચોષ્ટિતૈઃ ક્લેશિતઃ
સોઽહં ત્વાં શરણં વ્રજામ્યવ વિભો શમ્ભો દયામ્ભોનિધે ॥ ૨॥

તારુણ્યે મદનેન પીડિતતનુઃ કામાતુરઃ કામિની-
સક્તસ્તદ્વશગઃ સ્વધર્મવિમુખઃ સદ્ભિઃ સદા દૂષિતઃ ।
કર્માકાર્ષમપારનારકફલં સૌખ્યાશયા દુર્મતિઃ
ત્રાહિ ત્વં કરુણાતરઙ્ગિતદૃશા શમ્ભો દયામ્ભોનિધે ॥ ૩॥

વૃદ્ધત્વે ગલિતાખિલેન્દ્રિયબલો વિભ્રષ્ટદન્તાવલિઃ
શ્વેતીભૂતશિરાઃ સુજર્જરતનુઃ કમ્પાશ્રયોઽનાશ્રયઃ ।
લાલોચ્છિષ્ટપુરીષમૂત્રસલિલક્લિન્નોઽસ્મિ દીનોઽસ્મ્યહં
ત્રાહિ ત્વં કરુણાતરઙ્ગિતદૃશા શમ્ભો દયામ્ભોનિધે ॥ ૪॥

ધ્યાતં તે પદામ્બુજં સકૃદપિ ધ્યાતં ધનં સર્વદા
પૂજા તે ન કૃતા કૃતા સ્વવપુષઃ સ્રગ્ગન્ધલેપાર્ચનૈઃ ।
નાન્નાદ્યૈઃ પરિતર્પિતા દ્વિજવરા જિહ્વૈવ સન્તર્પિતા
પાપિષ્ઠેન મયા સદાશિવ વિભો શમ્ભો દયામ્ભોનિધે ॥ ૫॥

સન્ધ્યાસ્નાનજપાદિ કર્મ ન કૃતં ભક્ત્યા કૃતં દુષ્કૃતં
ત્વન્નામેશ ન કીર્તિતં ત્વતિમુદા દુર્ભાષિતં ભાષિતમ્ ।
ત્વન્મૂર્તિર્ન વિલોકિતા પુનરપિ સ્ત્રીમૂર્તિરાલોકિતા
ભોગાસક્તિમતા મયા શિવ વિભો શમ્ભો દયામ્ભોનિધે ॥ ૬॥

સન્ધ્યાધ્યાનજપાદિકર્મકરણે શક્તોઽસ્મિ નૈવ પ્રભો
    દાતું હન્ત મતિં પ્રતીપકરણે દારાદિબન્ધાસ્પદે ।
નામૈકં તવ તારકં મમ વિભો હ્યન્યન્ન ચાસ્તિ ક્વચિત્
    ત્રાહિ ત્વં કરુણાતરઙ્ગિતદૃશા શમ્ભો દયામ્ભોનિધે ॥ ૭॥

કુમ્ભીપાકધુરન્ધરાદિષુ મહાબીજાદિષુ પ્રોદ્ધતં
    ઘોરં નારકદુઃખમીષદપિ વા સોઢું ન શક્તોઽસ્મ્યહમ્ ।
તસ્માત્ ત્વાં શરણં વ્રજામિ સતતં જાનામિ ન ત્વાં વિના
    ત્રાહિ ત્વં કરુણાતરઙ્ગિતદૃશા શમ્ભો દયામ્ભોનિધે ॥ ૮॥

માતા વાપિ પિતા સુતોઽપિ ન હિતો ભ્રાત્રાદયો બાન્ધવાઃ
    સર્વે સ્વાર્થપરા ભવન્તિ ખલુ માં ત્રાતું ન કેઽપિ ક્ષમાઃ ।
દૂતેભ્યો યમચોદિતેભ્ય ઇહ તુ ત્વામન્તરા શઙ્કર
    ત્રાહિ ત્વં કરુણાતરઙ્ગિતદૃશા શમ્ભો દયામ્ભોનિધે ॥ ૯॥

॥ ઇતિ શમ્ભુસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Sridhar Seshagiri seshagir at engineering.sdsu.edu

*Shambhu Stotram*

pdf was typeset on July 28, 2022

Please send corrections to *sanskrit@cheerful.com*